## अङ्गद बन्धः




तंनुरासपमेडेहं

हंडेमेऽपसरानुतं ।

तं रमापयमार्यासा

सार्यामायपमारतं ॥ ॥

शार्ङ्ग बन्धे लिखितोऽयं श्लोक :

(Sloka 6)

## गुच्छ बन्धः




धीर धीर सुरस्तुत्य नित्य सत्य नयप्रिय ।

भयनाशन शक्रेश दय श्रेयः प्रयश्च मे ॥ 95 ॥

स्पष्टोर्थः

# कण्ठाभरण बन्धः




तं श्री देव भव प्रजापति पतिं सोमार्यमाक्षं पर-

क्रूरं धीरवरं वरांबरधरं गोवर्धनोद्धारणम् ।

वन्देहं वसुदेव नन्द वदनानन्द प्रदं क्षमापतिं

नीतिक्षेमदमादरं घनघन श्री पात्र गात्रं हितम् ।। 96 ।।

तमिति । धनेत्यादि-घनाः - जलसान्द्राः ये घनाः मेघाः तेषां श्रियः शोभायाः पात्र-भाजनं गात्रं यस्य तं काळमेघ सदृश दिव्य विग्रहमित्यर्थः । हितं - सर्वेषां पितृत्वात् पथ्य भूतं भगवन्तं अहं भजे ।

# मत्स्य बन्धः




क्षीराब्धितनयानर्घ न्यूत्नरत्नचया रमा । ।

मारमातऽसमा सर्वनुता धृता शुभावतात् ।। 97 ।।

श्रीरेति । अनर्घः न्यूत्नानां रत्नानां चयः यस्यास्सा । शिष्टं स्पष्टं ।।

---

# वृश्चिक बन्धः




तेपमार सरोजाक्ष घनसार रसानघ ।

घनामोद दमोनाघहमीडेंघ्रिं रमापते ।। 98 ।।

तेपमारेति । अपमार-अमृत्यो । घनसाररस-घनसारस्य कर्पूरस्य रुचिरिव रुचिः यस्य आयोगिभोग्यगुण इत्यर्थः । घनामोदद नित्यानन्दद । अनघ । हे सरोजाक्ष । रमापते । मोनाघहं - मया-ज्ञानेन ऊनानां-हीनानां अज्ञानमित्यर्थः अघं - पापं हन्तीति मोनाघहं ते अंघ्रिं इडे । मा रोना मरणे कामे श्रृंगार मुख्य मधुरादि सुवेसीनिर्यास राग शरल * * पारदेषु । आस्वादन ध्वनि सुधाम्बु इति नानार्थरत्नमाला ।



# गोपुर बन्धः




श्रीदेव्या सह यं ह्यदार पुरुषं नारीद्वयं सेवते

गोरिक्य प्रमदं सु सम्ज्ञयमुनिभिः स्नेहप्रकर्षस्तुतं ।

संसद्रञ्जनमानसं सुरनदी स्यान्दांघ्रिपाथोरुहं

दीप्यच्छशोभमहो ममाद्य विरसा ताञ्चाप वागस्थिरा ॥ 99 ॥

श्रीति । यं पुरुषं श्रीदेव्या सह नारीद्वयं - भूनीळा - रूप महिषीद्वयं सेवते । स कथं ब्रूत इत्यत्राह - उदार पुरुषं गोरिक्थ प्रमदं-गोधने आनन्दो यस्य तं-गोपालमित्यर्थः । संसदः नित्यसूरिपरिषदः रञ्ने तत् तत् कैंकर्य प्रदानेन प्रीतिजनने मानसं यस्य तं । सुरनदीस्यन्दः अंघ्रिपाथोरुहात् यस्य तं - गंगा प्रवाहनिदान पदकमलं इत्यर्थः । सुसंज्ञेत्यादि - समीचीनज्ञान सनकादी मुनिस्ततं इत्यर्थः । दीप्यछशोभं स्पष्टं । एवं भूतं तं तथाविधं भगवन्तमपि अद्य विरसा-निस्सारा अस्थिरा ममवाक् आप स्तोतुमिति शेषः । ब्रह्मादिभिः स्तोतुं अशक्यस्य तस्य स्तोत्रे निर्लज्जः कथं प्रवृत्तोऽहमिति भावः । पार्श्वद्वय कोष्टेषु ''रामभद्र सम्ज्ञय सद्वरीय पञ्चास्य दीप्रहरिगोपुर'' इत्युद्धारो द्रष्टव्यः ।

(द्रव्यं वित्तं स्वापथेयं रिक्थमृक्थं धनं वसु ।

मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः । इति अमरः)

# बृन्दावन बन्धः




उद्वृत्तकन्नैच्यनिधिं कोपिनं त्वेनसांबिलम् ।

नेच्छन्राघवसाघस्त्वत्पदं लिप्सेऽवमागतिम् ॥ 100 ॥

उद्वृत्तकमिति । उद्वृत्त्कं - रजस्तमः प्रचुरत्वेन सदाचाररहितं । नैच्यनिधिं - संसारित्वेन नीचत्वाश्रयं । कोपिनं - स्पष्टं । एनसांबिलं - प्रकृतिवश्यत्वेन अनादिपापवासनात् दूषितहृदयं त्वदन्यमिति शेषः । न इच्छन्-चतुर्मुखादेरपि प्रकृतिवश्यत्वेन मत्समान योगक्षेमत्वात् तत् प्राप्तौ प्रयोजनाभावात् तथा तथाविधे त्वत् व्यतिरिक्त पुरुषे मम इच्छा नास्तीति भावः । साघः अनेकपापवान् अहं - हे राघव ! अगतिं मां अव- शरणागतं मां मोक्षप्रदानेन रक्ष इति भावः । मद्यकोष्टेषु " उन्नैनंबिनेन्राघव" (इति द्रविडभाषा वाक्यं - यस्यार्थः च त्वां एव विश्वसिमि राघव इति भवति) इत्युद्धारः ।

# अर्धभ्रमक बन्धः

असुराधिकरानन्त सुराधिपनतावन ।

राधिकापावेशताराधिप पाब्दि भवेन क ॥ 101 ॥

असुरेति । असुराधिकर - असुरोपद्रव कर । अनन्त । सुराधिप । नतान् अवतीति तथोक्तं । राधा एव-राधिका तां पातीति तथोक्तं । इश सर्वेश्वर । ताराधिपवत् पा-प्रसन्ना या अब्धिभवा - लक्ष्मीः तस्याः इनः - प्रभो । क-विष्णो अव-रक्ष । पास्त्रिष्वार्ते प्रसन्नेच । को ब्रह्मात्मानिलार्काग्नि विष्णुधी यम केकिषु इति नानार्थ रत्नमाला ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| अ | सु | रा | धि | क | रा | न | न्त |
| सु | रा | धि | प | न | ता | व | न |
| रा | धि | का | पा | वे | श | ता | रा |
| धि | प | पा | ब्दि | भ | वे | न | क |

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1 ↓ | 3 ↓ | 5 ↓ | 7 ↓ | 2 → | | | |
| | | | | 4 → | | | |
| | | | | 6 → | | | |
| | | | | 8 → | | | |

# सर्वतो भद्र बन्धः

शपा रमा मारपाश - पानताजजतानपा ।

रताजराराजतार - माजराननराजमा ॥ 102 ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| श | पा | र | मा | मा | र | पा | श |
| पा | न | ता | ज | ज | ता | न | पा |
| र | ता | ज | रा | रा | ज | ता | र |
| मा | ज | रा | न | न | रा | ज | मा |
| मा | ज | रा | न | न | रा | ज | मा |
| र | ता | ज | रा | रा | ज | ता | र |
| पा | न | ता | ज | ज | ता | न | पा |
| श | पा | र | मा | मा | र | पा | श |

शपेति । शपा-शे-श्रेयसि विषये पा-प्रसन्ना । मारपाशपानताजजतानपा - मारपाशेन पाः - आर्ताः ये आनताः भक्ताः तेषां ये अजजता - मन्मथजेतृत्वं नः - ज्ञानं मन्मथजयहेतु भूत विवेकं चेतित्यर्थः तौ पातीति तथोक्ता । यद्वा तयोर्विषये पाः - प्रसन्ना तेषां मन्मथजयः तत् हेतु भूतविवेकश्च भूयादित्यनुग्रहं करोतीति भावः । रताजरा - रतः प्रीतः, अजरः भगवान् यस्यामिति तयोक्ता । अरमा-रः क्षयः, मः-बन्धनञ्च न विद्यते यस्याः सा - सर्वविकाररहिता अप्रतिहत शलिश्चेत्यर्थः । अजराननराजमा - अजरः - विष्णुः तस्य




आननमेव राजा-चन्द्रः तस्मिन् मा-धीः यस्याः सा रमा लक्ष्मीः अराजत-विष्णुवक्षसि इति शेषः । अथ शं क्लीबे शास्त्रे श्रेयसि मंगळे । मः पुंसि बञ्जने । मा स्त्री माने मृतो वेला मेधा श्री मध्यमातृषु । पस्त्रिष्वार्ते प्रसन्नेच । अजश्शंभौ विष्णुधात्रोः कामे । जो जपे विजये मेरौ शब्दे जेतरि मत्सरे । नाभौ नं ज्ञानवाद्ययोः । रः पुमान् पावके कामे क्षये । इति सर्वत्र नानार्थ रत्नमाला ।

This sloka can be read from left to right and right to left, as also from top to bottom and bottom to top.